मत्त्यरातिमग्ने ॥ व्विश्वाह्यग्नेदुरितासहुस्वाथास्म्मन्भ्यंꣳसुहवीं
राꣳरयिन्दाꣳ ॥ ६ ॥ अनाधृष्ट्योजातवेदाꣳ ॥ अनाधृष्ट्योजातवे

दाऽअनिष्टृतोव्विराडग्नेक्षत्रभृद्दीदिहीह ॥ व्विश्वाऽआशाꣳप्रमुञ्च
न्मानुषीर्भ्यःशिवेभिरद्यपरिपाहिनोव्वृधे ॥ ७ ॥ बृहꣳस्पतेसवि
तः ॥ बृहꣳस्पतेसवितर्ब्बोधयैनꣳसꣳशितश्चित्सन्तुराꣳसꣳशिशाधि ॥
व्वर्द्धयैनम्महतेसौभगायुव्विश्वꣳऽएनमनुमदन्तुदेवाः ॥ ८ ॥ अमुत्रभू
यादधं ॥ अमुत्रभूयादधयद्युमस्युबृहꣳस्पतेऽअभिशꣳस्तेरमुञ्चꣳ ॥ प्र
त्त्यौहतामुश्विनामृत्युमंस्म्माद्देवानामग्नेभिषजाशचींभिꣳ ॥ ९ ॥
उद्वयम् ॥ उद्वयन्तमंसुस्परिस्वꣳ÷पश्यंन्तुऽउत्तरम् ॥ देवन्देवत्रासू
र्य्यमगंन्मज्ज्योतिरुत्तमम् ॥ १० ॥ [१०] ऊर्द्धाऽअस्यसमिधोभव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्त्यूर्द्धाशुक्राशोचीꣳष्युग्नेः ॥ द्युमत्तंमासुप्रतीकस्यसूनोः ॥११॥ तनूनपादसुरः॥ तनूनपादसुरोविश्श्ववेदादेवोदेवेषुदेवः ॥ पृथोऽअ नक्कुमद्धांघृतेन ॥ १२ ॥ मद्धांयुज्ञम् ॥ मद्धांयुज्ञन्नंक्षसेप्रीणानोनरा शꣳसोऽअग्ने ॥ सुकृद्देवꣳसवितार्विश्श्ववारꣳ ॥ १३ ॥ अच्छायम् ॥ अच्छायमेति ॥ शवसाघृतेनेडानोवन्हिर्न्नमंसा ॥ अग्निꣳस्रुचोऽअ ध्वरेषुप्रयत्सु ॥ १४ ॥ सयक्षत् ॥ सयक्षदस्यमहिमानंमुग्नेꣳसऽईं म्मुन्द्रासुप्रयसः॥ वसुश्चेतिष्ठोवसुधातंमश्च ॥ १५ ॥ द्वारोदेवीः॥ द्वारोदेवीरन्वस्युविश्श्वेब्रतादंदन्तेऽअग्नेः ॥ उरुव्यचंसोधाम्म्नापत्त्यं

मानाः ॥ १६ ॥ शतम् १५०० तेऽअस्य ॥ तेऽअस्युयोषणेदिव्येनयो नांऽउषासानक्तां ॥ इमंꣳयुज्ञमंवतामध्वरन्नः॥ १७ ॥ दैव्याहोतारा ॥ ऽऊर्द्धमंध्वरन्नोग्नेर्जिह्वामुभिगृणीतम् ॥ कृणुतन्नुꣳस्विष्टिम्॥ १८ ॥ तिस्रोदेवीꣳ ॥ तिस्रोदेवीर्ब्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती ॥ मही गृणाना ॥ १९ ॥ तन्नः॥ तन्नस्तुरीपमद्भुतम्पुरुक्षुत्वष्टासुवीर्य्यम् ॥ रायस्पोषंविष्ण्यंतुनाभिमुस्म्मे ॥ २० ॥ वनस्पतेवसृजाररांणु स्तमनादेवेषु ॥ अग्निर्हव्यꣳशमितासूदयाति ॥ २१ ॥ अग्नेस्वा हा ॥ कृणुहिजातवेदइऽन्द्रायहव्यम् ॥ विश्श्वेदेवाहविरिदꣳजुषन्ताम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ २२ ॥ [१२ ॥ पीवोऽअन्नारयिवृधं÷ ॥ सुमेधाश्श्वेतꣳसिषक्ति
नियुतामभिश्श्रीः ॥ तेव्वायवेसमनसोव्वितंस्तथुर्व्विश्श्वेन्नरं÷स्वपत्त्या
निचक्रुः ॥२३॥ रायेनु ॥ यज्जुज्ञतूरोदंसीमेरायेदेवीधिषणांधातिदे
वम् ॥ अर्धंव्वायुन्नियुत्तं÷सश्चतस्वाऽउतश्श्वेतंव्वसुंधातिन्निरेके ॥२४॥
आपोह॥आपोहियद्बृहतीर्व्विश्श्वमायु न्नगर्भ्मुन्दधानाजुनयंन्तीरग्निम्॥
ततोदेवानाꣳसमवर्त्ततासुरेकुꣳकस्म्मैदेवायहविषाव्विधेम ॥ २५ ॥ य
श्चित्॥यश्चिदापोमहिनापुर्य्यपश्युदक्षुन्दधानाजुनयंन्तीर्य्यज्ञम् ॥
योदेवेष्ववधिदेवऽएकऽआसीत्कस्म्मैदेवायहविषाव्विधेम ॥ २६ ॥ प्र

याभिः÷ ॥ प्रयाभिर्य्यासिदाश्वाꣳसुमच्छानियुद्भिर्व्वायविष्टयेदुरो
णे॥निनोरयिꣳसुभोजंसंय्युवस्वनिवीरङ्गव्युमश्श्व्यंश्चराधः÷॥ २७ ॥
आनः÷ ॥ आनोनियुद्भिः÷शतिनीभिरध्वरꣳसहस्त्रिणीभिरुपयाहियज्ञ
म् ॥ व्वायोऽअस्म्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिꣳसदानः ॥
॥ २८ ॥ नियुत्त्वान्नवायो ॥ नियुत्त्वान्नवायुवागह्ययꣳशुक्रोऽअया
मिते ॥ गन्तासिसुन्वतोगृहम् ॥ २९ ॥ व्वायोशुक्रः ॥ व्वायोशुक्रोऽ
अयामितेमद्धोऽअग्ग्रुदिविष्टिषु ॥ आयाहिसोमंपीतयेस्प्पाहोर्देवनि
युत्वता ॥ ३० ॥ व्वायुरग्ग्रेगाः ॥ वायुरग्ग्रेगायज्ञप्प्रीःसाकङ्गन्मन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सायुज्ञम् ॥ शिवोनियुद्भिः÷शिवाभिः ॥ ३१ ॥ व्वायोये ॥ तैंसहस्रि
णोरथांसुस्तेभिरागंहि ॥ नियुत्त्वान्त्सोमंपीतये ॥ ३२ ॥ एकंयाच ॥
दशभिश्च्चस्वभूतेद्वाभ्यांमिष्टयैंव्विꣳशतीच्चं ॥ तिसृभिश्च्चव्वहंसोत्रेꣳ
शतांचनियुद्भिर्व्वायविहताव्विमुंञ्च ॥ ३३ ॥ तवंव्वायो ॥ तवंव्वायवृत
स्प्पतेत्त्वष्ट्टर्ज्जामारद्भुत ॥ अवाꣳस्यावृणीमहे ॥ ३४ ॥ [१२ ॥ अभि
त्त्वा ॥ शूरनोनुमोदुग्गधाऽइवधेनवः÷ ॥ ईशांनमुस्यजगतꣳस्वर्दृशमी
शांनामिन्द्रतुस्त्थुषः÷ ॥ ३५ ॥ नत्त्वावांन् ॥ नत्त्वावां ँ३ ॥ अन्योदि
व्यांनपार्त्थिवोनजातोनजनिष्ष्यते ॥ अश्श्वायन्तोमघवन्निन्द्रव्वा

जिनोंगुह्यन्तंस्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवांमहे
सातौव्वाजंस्यकारवः÷ ॥ त्वांवृत्रेष्विन्द्रसत्त्पंतिन्नरस्त्वाङ्काष्ठास्वर्व्वं
तꣳ ॥ ३७ ॥ सत्त्वम् ॥ सत्त्वन्नांश्च्चित्रव्वज्जहस्तधृष्णुयामुहस्तंवा
नोऽअद्रिवः ॥ गामश्श्वंरथ्यमिन्द्रसङ्किरसुत्रावाजुन्नजिग्ग्युषे ॥
॥ ३८ ॥ कयांनꣳ ॥ कयांनश्च्चित्रऽआभुवदूतीसुदावृधꣳसखा॥कया
शच्चिष्ठयावृता॥ ३९ ॥ कस्त्वां ॥ सुत्त्योमदांनाम्मꣳहिष्ठोमत्सुदन्धं
सः ॥ दृढाच्चिदारुजेव्वसु ॥ ४० ॥ अभीषुणः÷ ॥ अभीषुणꣳसखीना
मविताजरित्तृणाम् ॥ शतम्भवास्यूतयै ॥ ४१ ॥ घृज्ञायंज्ञावꣳ॥ घृज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंज्ञावोऽअग्न्नयैंगिरागिंराचुदक्षसे ॥ प्रप्रंवुयमुमृतंञ्जातवेंदसम्प्रिय
म्मित्रन्नशंꣳसिषम् ॥ ४२ ॥ पाुहिनः÷ ॥ पाुहिनौऽअग्न्नुऽएकंयापाुह्यु
तद्वितीयंया ॥ पाुहिगीर्ब्भिस्तिसृभिरूर्ज्जाम्पतेपाुहिचंतुसृभिर्व्वसो
॥ ४३ ॥ ऊर्ज्जोंनपांतम् ॥ ऊर्ज्जोंनपांतुꣳसहिनायमंस्म्मुयुर्द्दाशेम
हव्ययदांतये ॥ भुवद्वाजैष्ष्वविताभुवद्धधऽउतत्रांतातुनूनाम् ॥ ४४ ॥
सुंव्वत्सुरोसि ॥ परिवत्सुरोसीदावत्सुरोसीद्वत्सुरोसिवत्सुरोसि ॥
उषसंस्त्तेकल्प्पन्तामहोरात्रास्त्तैकल्प्पन्तामर्द्धमासास्त्तैकल्प्पन्तु
म्मासांस्त्तेकल्प्पन्तामृतवंस्त्तेकल्प्पन्ताꣳसंव्वत्सुरस्त्तैकल्प्पताम् ॥

प्रेत्त्याऽएत्त्यैसञ्चाञ्चुप्रचंसारय ॥ सुपुर्णुचिदंसितयांदेवतंयाङ्गिरस्व
द्ध्रुवःसींद॥४५॥[११]इतिशुक्लयजुःसंहितायांसप्तविंशोध्यायः ॥२७॥
होतायक्षदेकादशदेवंबर्हिर्द्वादशपुनरप्येवंचत्त्वारःषट्चत्त्वारिꣳशत्॥
होतांयक्षत् ॥ होतांयक्षत्त्सुमिधेन्द्रंमिडस्पदेनाभांपृथिव्याऽअधि ॥
दिवोव्वष्म्मुन्त्सामिंद्धचतुऽओजिष्ठश्चर्षणीसहुंव्वित्त्वाज्ज्यंस्युहोतुर्य्य
जं ॥१॥ होतांयक्षुत्तनूनपांतमूतिभिः÷॥होतांयक्षुत्तनूनपांतमूतिभिर्ज्जे
तांरमपंराजितम् ॥इन्द्रंन्देवꣳस्वर्व्विदम्पृथिभिर्म्मधुमत्तमैर्न्नराशꣳसं
नुतेजंसाव्वित्त्वाज्ज्यंस्युहोतुर्य्यज॥२॥होतांयक्षुदिडाभिरिन्द्रम् ।होतां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यक्षुदिडाभिरिन्द्रमीडितमाजुह्वानुमम॑त्त्यम्॥ देवोदेवैᳬसवींऽर्य्योव्वज्ज्रं
हस्त्तᳬपुरन्दरोव्वेत्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ ३ ॥ होतायक्षद्बर्हिषीन्द्रम् ॥
होतायक्षद्बर्हिषीन्द्रंन्निषद्वरंव्वृषभन्नर्य्याँपसम् ॥ व्वसुभीरुद्रैरादित्त्यैᳬ
सयुग्भिर्ब्बर्हिरासंदद्वेत्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ ४ ॥ होतायक्षुदोजोनव्वी
र्य्युᳬसहोद्वारऽइन्द्रंमवर्द्धयन्॥ सुप्प्रायुणाऽअस्म्मिन्न्युज्ञेव्विᳬश्श्रंयन्ता
मृतावृधोद्वारऽइन्द्रायमीढुषेद्व्यन्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ ५ ॥ होतायष
क्षदुषेऽइन्द्रस्य ॥ धेनूसुदुघेमातरामुही ॥ सुवातरौनतेजंसाव्वुत्त्समि
न्द्रंमवर्द्धतांव्वीतामाज्ज्यंस्युहोतुर्य्यजं ॥ ६ ॥ होतायक्षुद्दैव्यौहोतारा

भिषजासखायाहुविषेन्द्रम्भिषज्ज्यतᳬ॥ कुवीदेवौप्प्रचेतसाविन्द्रांय
धत्तऽइन्द्रियंव्वीतामाज्ज्यंस्युहोतुर्य्यजं ॥ ७ ॥ होतायक्षत्तिस्रोदेवीᳬ॥
होतायक्षत्तिस्रोदेवीर्न्नभैषुजन्त्रयंस्त्रिधातंव्वोपसुऽइडासरस्वतीभारं
तीमुहीᳬ॥ इन्द्रंपत्त्क्कीर्हुविष्म्मंतीर्य्यन्त्वाज्ज्यंस्युहोतुर्य्यजं ॥८॥ हो
तायक्षुत्त्वष्टारमिन्द्रम् ॥ होतायक्षुत्त्वष्टारमिन्द्रंन्देवम्भिषजंᳬसुयजं
ङ्कृतुᳬश्श्रियम् ॥ पुरुरूपंᳬसुरेतसम्मुघोनुमिन्द्रायुत्त्वष्टादधंदिन्द्रिया
णिव्वेत्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ ९ ॥ होतायक्षुद्वनुस्प्पतिंᳬशमितारम्॥
होतायक्षुद्वनुस्प्पतिंᳬशमितारंᳬशृतङ्कृतुन्धियोजोष्टारमिन्द्रियम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मद्धांसमुञ्जन्पथिभिः सुगेभिस्स्वदांतियुज्ञम्मधुनाघृतेनुव्वे त्वाज्ज्यं स्युहोतुर्य्यजं ॥ १० ॥ होतायक्षुदिन्द्रꣳस्वाहा ॥ होतायक्षुदिन्द्रꣳ स्वाहाज्ज्यंस्युस्वाहामेदंसुꣳस्वाहास्तोकानाꣳस्वाहास्वाहाकृतीनाꣳ स्वाहाहुव्यसूक्षीनाम् ॥ स्वाहादेवाऽआज्ज्यपाजुषाणाऽइन्द्रऽआज्ज्यंस्युद्यन्तुहोतुर्य्यजं ॥ ११ ॥ [११] देवम्बर्हिरिन्द्रꣳसुदेवन्देवैर्व्वीरवंत्स्तीर्णंव्वेद्यामवर्द्धयत् ॥ व्वस्तोर्व्वृतम्प्राक्तोर्ब्भृतꣳरायाबर्हिष्म्मतोत्त्यंगाद्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥ १२ ॥ देवीर्द्वारः÷ ॥ देवीर्द्वारऽइन्द्रꣳसङ्घातेव्वीड्वीर्य्यामंन्नवर्द्धयन् ॥ आवुत्सेनुतरुणेनकुमारेणंचमीवुता

पाव्वाँणꣳरेणुकंकाटन्नुदन्तांव्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥ १३ ॥ देवीऽउषासानक्तां ॥ देवीऽउषासानक्तेन्द्रंय्यज्ञेप्प्रयुक्त्यव्हेताम् ॥ दैवीर्व्विशुꣳप्रायांसिष्टाꣳसुप्प्रीतेसुधितेव्वसुव्वनेव्वसुधेयंस्यव्वीतांय्यजं ॥ १४ ॥ देवीजोष्ट्रीं ॥ देवीजोष्ट्रीवसुधितीदेवमिन्द्रमवर्द्धताम् ॥ अयांव्युन्न्या घाद्वेषाꣳस्यान्न्याव्वंक्षुद्वसुव्वाय्याँणियजंमानायशिक्षितेव्वसुवनेव्वसुधेयं स्यव्वीतांय्यजं ॥ १५ ॥ देवीऽऊर्ज्जाहूंती ॥ देवीऽऊर्ज्जाहूंतीदुघैसुदुघेपयुसेन्द्रंमवर्द्धताम् ॥ इषमूर्ज्जंमुन्न्याव्वंक्षुत्त्सग्गिधुर्ꣳसपीतिमुन्न्या नवैनुपूर्व्वुन्दयंमानेपुराणेनुनवुमधांतामूर्ज्जंमूर्ज्जाहुंतीऽऊर्ज्जयंमानेव्वसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्वाऽर्य्याणिषजंमानायशिक्षितेव्वंसुवनेव्वसुधेयंस्यव्वीतुांऽयजं ॥ १६ ॥
देवादैव्या ॥ देवादैव्याहोतारादेवमिन्द्रंमवर्द्धताम् ॥ हुताघंशꣳसा
वाभांष्ट्रांव्वसुव्वाऽर्य्याँणियजंमानायशिक्षितौव्वंसुवनेव्वसुधेयंस्यव्वीतुांऽय
जं ॥ १७ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रंम
वर्द्धयन् ॥ अस्पृक्षद्धारंतीदिवंꣳरुद्रैर्य्युज्ञꣳसरंस्वतीड्वंसुमतीगृहा
न्व्वंसुवनेव्वसुधेयंस्यद्व्यन्तुयजं ॥ १८ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोन
राशꣳसंस्त्रिवरूथस्त्रिवन्धुरोदेवमिन्दंमवर्द्धयत् ॥ शुतेनांशितिपृष्ठा २२३
नामाहिंतꣳसुहस्त्रेणुप्प्रवंर्ततेमित्रावरुणेदंश्यहोत्रमर्हंतोबृहस्पतिं

स्तोत्रमुꣳश्विनाद्धंऽर्य्यवंव्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥ १९ ॥ देवोदे
वैः ॥ देवोदेवैर्व्वनुस्पतिर्हिरंण्यपर्णोमधुंशाखꣳसुपिप्पलोदेवमिन्द्रंम
वर्द्धयत् ॥ दिवुमग्र्येणास्पृक्षुदान्तरिक्षम्पृथिवीमंदृꣳहीद्वसुवनेव्वसुधे
यंस्यव्वेतुयजं ॥ २० ॥ देवम्बर्हिः ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रंम
वर्द्धयत् ॥ स्वासुस्थमिन्द्रेणासंन्नमुन्याबर्हीꣳष्युभ्यूभूद्वसुवनेव्वसु
धेयंव्वेतुयजं ॥ २१ ॥ देवोऽअग्निः ॥ देवोऽअग्निꣳस्विष्टकृद्देवमिन्द्र
मवर्द्धयत् ॥ स्विष्टङ्कृर्व्वन्त्स्विष्टकृत्स्विष्टमुद्यकरोतुनोव्वसुवनेव्वसुधेय
स्यव्वेतुयजं ॥ २२ ॥ अग्निमुद्य ॥ होतारमवृणीतायंऽयजंमानुꣳप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चुन्नपक्कीःपचन्नपुरोडाशम्बद्धन्निन्द्रायुच्छागम् ॥ सूपस्थाऽअद्यदे
वोवनुस्पतिरभवदिन्द्रायुच्छागैन ॥ अघुतम्मैदुस्त्तःप्प्रतिपचुता
ग्ग्रंभीदवींवृधत्तपुरोडाशैन ॥ त्वामुद्यऽऋषे ॥ २३ ॥ [१२] होता
यक्षत् ॥ होतायक्षत्त्सभिधानम्मुहद्यशुꣳसुसंमिद्धंवरैण्यमुग्निमिन्द्रं
ब्वयोधसंम् ॥ गायुत्रीञ्छन्दऽइन्द्रियन्त्र्यविङ्गांवयोदधद्वेत्त्वाज्ज्यस्यु
होतुर्य्यजं ॥२४॥ होतायक्षुत्तनूनपातमुद्भिदम् ॥ होतायक्षुत्तनूनपात
मुद्भिदंयङ्गन्भुमादितिर्दुधेशुचिमिन्द्रंब्वयोधसंम् ॥ डुष्णिहुञ्छन्दऽइ
न्द्रियन्दित्त्युवाहुङ्गांवयोदधद्वेत्त्वाज्ज्यस्युहोतुर्य्यजं ॥ २५ ॥ होता

यक्षदीडेन्यंमीडितम् ॥ होतायक्षदीडेन्यंमीडितंवृत्रुहन्तमुमिडाभि
रीडुचुर्ꣳसहुꣳसोमुमिन्द्रंब्वयोधसंम् ॥ अनुष्टुभुञ्छन्दऽइन्द्रियम्पञ्चा
विङ्गांवयोदधद्वेत्त्वाज्ज्यस्युहोतुर्य्यजं ॥ २६ ॥ होतायक्षत्त्सुबर्हिष
म्पूषण्वन्तंम् ॥ होतायक्षत्त्सुबर्हिषंम्पूषण्वन्तुमर्म्मर्त्युꣳसीदन्तम्बर्हि
षिंप्प्रियेमृतेन्द्रंब्वयोधसंम् ॥ बृहतीञ्छन्दऽइन्द्रियन्त्रिवृत्त्सङ्गांवयोद
धद्वेत्त्वाज्ज्यस्युहोतुर्य्यजं ॥ २७ ॥ होतायक्षुद्दचंस्वतीꣳसुप्प्रायु
णाꣳ॥ होतायक्षुद्दचंस्वतीꣳसुप्प्रायुणाऽऋतावृधोद्वारोदेवीर्हिरण्ययी
र्ब्रह्माणमिन्द्रंब्वयोधसंम् ॥ पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहुङ्गांवयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दधुद्वचन्त्वाज्ज्यस्युहोतुर्य्यजं ॥ २८ ॥ होतायक्षत्त्सुपेशंसासुशि
ल्पे ॥ बृहतीऽउभेनक्कोषासानदंर्शतेविश्श्वमिन्द्रंव्वयोधसम् ॥ त्रि
ष्टुभुच्छदंऽइहेन्द्रियम्पष्ठुवाहङ्गांव्वयोदधद्धीतामाज्ज्यस्युहोतुर्य्यजं ॥
॥ २९ ॥ होतायक्षुत्प्रचेतसादेवानांमुत्तमंय्यशोहोतांरादैव्यांकुवीसु
युजेन्द्रंव्वयोधसम् ॥ जगतीच्छन्दंऽइन्द्रियमनुड्वाहङ्गांव्वयोदधद्धीता
माज्ज्यस्युहोतुर्य्यजं ॥ ३० ॥ होतायक्षुत्पेशंस्वतीस्तिस्त्रः ॥ होता
यक्षुत्पेशंस्वतीस्तिस्त्रोदेवीर्हिरण्ययीर्भारंतीर्बृहतीर्म्मुहीःपतिमिन्द्रं
व्वयोधसम् ॥ विराजुच्छन्दंऽइहेन्द्रियन्धेनुङ्गान्नव्वयोदधद्धचन्त्वाज्ज्य

स्युहोतुर्य्यजं ॥ ३१ ॥ होतायक्षत्त्सुरेतंसुन्त्वष्टारम् ॥ होतायक्षत्त्सु
रेतंसुन्त्वष्टारम्पुष्टिवर्द्धनꣳरूपाणिबिभ्रंतम्पृथुक्षपुष्टिमिन्द्रंव्वयोधस
म् ॥ द्विपदुच्छन्दंऽइन्द्रियमुक्षाणङ्गान्नव्वयोदधद्धेत्त्वाज्ज्यस्युहोतुर्य्य
जं ॥ ३२ ॥ होतायक्षुद्वनुस्पतिꣳशमितारम् ॥ होतायक्षुद्वनुस्प
तिꣳशमितारꣳशुतक्रतुꣳहिरण्यपर्णमुक्तिथनꣳरशुनाम्बिभ्रंतंव्वृशि
म्भगुमिन्द्रंव्वयोधसम् ॥ कुकुभुच्छन्दंऽइहेन्द्रियंव्वृशांव्वेहतङ्गांव्वयोद
धद्धेत्त्वाज्ज्यस्यहोतुर्य्यजं ॥ ३३ ॥ होतायक्षुत्स्वाहाकृतीरुग्निम् ॥
होतायक्षुत्स्वाहाकृतीरग्निङ्गृहपतिम्पृथुग्गवरुणम्भेषजङ्कविङ्गुत्रामिन्द्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्वयोधसंम् ॥ अतिच्छन्दसुच्छन्दऽइन्द्रियम्बृहद्दृषभङ्गांव्वयोदधुद्व्य
न्त्वाज्ज्यस्युहोतुर्य्यजं॥३४॥[११]देवम्बर्हिः ॥ देवम्बर्हिर्व्वयोधसंन्दे
वमिन्द्रंमवर्द्धयत् ॥ गायुत्र्याच्छन्दसेन्द्रियश्चक्षुरिन्द्रेव्वयोदधंद्वसुवनें
व्वसुधेयंस्यव्वेतुयजं ॥३५॥ देवीर्द्वारः÷ ॥ देवीर्द्वारोंव्वयोधसुꣳशुचिमिन्द्रं
मवर्द्धयन् ॥ उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रेव्वयोदधंद्वसुवनेंव्वसु
धेयंस्यद्व्यन्तुयजं ॥ ३६ ॥ देवीऽउषासानक्ता ॥ देवमिन्द्रंव्वयोधस
न्देवीदेवमंवर्द्धताम् ॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेव्वयोदधंद्व
सुवनेंव्वसुधेयंस्यव्वीतांयजं ॥ ३७ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीव्वसुंधि

तीदेवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ बृहत्त्याच्छन्दसेन्द्रियꣳ
श्रोत्रमिन्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वीतांयजं ॥ ३८ ॥ देवीऽऊर्ज्जाहु
ती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयुसेन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम्॥
पङ्क्त्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वीतां
ठ्यजं ॥ ३९ ॥ देवादैव्या ॥ देवादैव्याहोतारादेवमिन्द्रंव्वयोधसंन्देवौ
देवमंवर्द्धताम्॥ त्रिष्टुभाच्छन्दसेन्द्रियन्त्विषिमिन्द्रेव्वयोदधंद्वसुवनेंव्व
सुधेयंस्यव्वीतांयजं॥४०॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीर्व्वयो
धसुम्पतिमिन्द्रंमवर्द्धयन् ॥ जगत्त्याच्छन्दसेन्द्रियꣳशूषमिन्द्रेव्वयोद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धंद्वसुवनैंव्वसुधेर्यस्यद्व्यन्तुयजं४१॥ देवोनराशꣳसं÷॥ देवोनराशꣳसो
देवमिन्द्रंव्वयोधसंन्देवोदेवमंवर्द्धयत् ॥ व्विराजुच्छन्दंसेन्द्रियꣳरूप
मिन्द्रेव्वयोदधंद्वसुवनैंव्वसुधेर्यस्यव्वेतुयजं ॥ ४२ ॥ देवोव्वनुस्प्पतिं÷॥
देवोव्वनुस्प्पतिंर्द्देवमिन्द्रंव्वयोधसंन्देवोदेवमंवर्द्धयत् ॥ द्विपंदुच्छन्दं
सेन्द्रियम्भगमिन्द्रेव्वयोदधंद्वसुवनैंव्वसुधेर्यस्यव्वेतुयजं ॥ ४३ ॥ देव
म्बुर्हिः ॥ देवम्बुर्हिर्व्वारितीनान्देवमिन्द्रंव्वयोधसंन्देवन्देवमंवर्द्धयत् ॥
कुकुभुच्छन्दंसेन्द्रियंय्यशुऽइन्द्रेव्वयोदधंद्वसुवनैंव्वसुधेर्यस्यव्वेतुयजं ॥
॥ ४४ ॥ देव्वोऽअग्निꣳ ॥ स्विष्टकृद्देवमिन्द्रंव्वयोधसंन्देवोदेवमंवर्द्ध

उ.अ. २८ २२७

यत् ॥ अतिच्छन्दसाुच्छन्दंसेन्द्रियङ्क्षुत्रमिन्द्रेव्वयोदधंद्वसुवनैंव्वसु
धेर्यस्यव्वेतुयजं ॥ ४५ ॥ अग्निमुद्य ॥ होतांरमवृणीतायंय्यजंमानुꣳ
पचुन्नपक्कीःपचंन्नपुरोडाशंम्बुद्धन्निन्द्रांयव्वयोधसेच्छागंम् ॥ सूपुस्त्था
ऽअुद्यदेवोव्वनुस्प्पतिंरभवुदिन्द्रांयव्वयोधसेच्छागैंन ॥ अघुत्तम्मैंदुस्तꣳ
प्प्रतिंपचुताग्ग्रंभीुदवींवृधत्तपुरोडाशैंन ॥ त्वामुद्यऽऋंषे ॥४६॥ [१२]
४ इति श्रीवाजसनेयशुक्लयजुःसंहितायामष्टाविंशोऽध्यायः ॥ २८ ॥
समिद्धोअअन्नेकादशयदक्रंदस्त्रयोदशसमिद्धोअद्यद्वादशकेतुंकृण्वं
श्चत्वारःषष्टिः ॥ समिद्धोऽअुअन् ॥ समिद्धोऽअुअन्कृदंरम्मतीनाꣳ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमग्ने मधुमत्तिपन्नवमानꣳ ॥ व्राजीव्वहन्नवाजिनꣳआतवेदो देवानांव्वक्षि
प्रियमासुधस्त्थम् ॥ १ ॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथोदेवया
नान्प्रजानन्नवाज्ज्यप्येतुदेवान् ॥ अनुत्त्वासप्तेप्रदिशꣳसचन्ताꣳ
स्वधामस्म्मैयजमानायधेहि ॥ २ ॥ ईड्यश्च ॥ ईड्यश्चासिवन्द्य
श्चव्वाजिन्नाशुश्चासिमेद्धर्यश्चसप्ते ॥ अग्निष्ट्वादेवैर्व्वसुभिꣳसुजोषाꣳ
प्रीतंव्वन्निंहव्वहतुजातवेदाꣳ ॥ ३ ॥ स्तीर्णम्बर्हिः ॥ सुष्टरीमाजुषाणो
रुपृथुप्प्रथमानम्पृथिव्यां ॥ देवेभिर्य्युक्तमदितिꣳसुजोषाꣳस्योनꣳ
ण्वानासुवितेदधातु ॥ ४ ॥ एताऽउवꣳ ॥ सुभगाव्विश्वरूपाव्विपक्षो

भिꣳश्रयमाणाऽउदातैꣳ ॥ ऋष्वाःसुतीःकुवपुꣳशुम्भमानाद्वारोदेवीः
सुप्प्रायुणाभवन्तु ॥ ५ ॥ अन्तुरामित्रावरुणा ॥ अन्तुरामित्रावरुणा
चरन्तीमुखंव्यज्ञानामभिसंव्विदाने ॥ उषासांवाꣳसुहिरण्ण्येसुशि
ल्पेऽऋतस्ययोनाविहसादयामि ॥ ६ ॥ प्रथुमावाम् ॥ प्रथुमावाꣳ
सरथिनासुवर्णादेवौपश्यन्तौभुवनानिव्विश्वा ॥ अपिप्प्रयुश्चोदना
वाम्मिमानाहोतारांज्ज्योतिःप्प्रदिशादिशन्ता ॥ ७ ॥ आदित्त्यैन्नः ॥
आदित्त्यैन्नौभारतीव्वष्टुयुज्ञꣳसरस्वतीसहरुद्रैर्न्नऽआवीत् ॥ इडोपहू
ताव्वसुभिꣳसुजोषायुज्ञन्नोदेवीरमृतेषुधत्त ॥ ८ ॥ त्त्वष्टाव्वीरम् ॥ त्त्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टांद्वीरन्देवकांमञ्जजानुत्त्वष्टुरद्वाँजायतऽआशुरश्श्वः÷॥त्त्वष्टेदंद्विश्श्वरु
म्भुवंनञ्जजानबृहोऽकुर्त्तारंमिहयंक्षिहोतꣳ ॥ ९ ॥ अश्श्वोंघृतेनुत्त्वम
न्यासमंक्तऽउपंदेवाꣳ ॥ ऽऋतुशꣳपाथंऽएतु ॥ द्वनुस्प्पतिंद्दैवलोकम्प्रं
जानन्नग्निमांहुद्व्यास्वंदितार्निवक्षत् ॥ १० ॥ प्रजापंतेस्त्तपंसा ॥ द्वा
वृधानꣳसुद्योजातोदंधिषेयुज्ञमंग्ने ॥ स्वाहांकृतेनहुविषांपुरोगायुहि
साद्धचाहुविरंदन्तुदेवाꣳ॥११॥[११]यदक्रन्दꣳ॥प्प्रथुमञ्जायंमानऽउद्द्य
न्त्संमुद्रादुतवापुरीषात् ॥ श्येनस्यंपक्षाहंरिणस्यंबाहूऽउपस्तुत्त्युम्म
हिंजातन्तैऽअर्व्वन्१२॥युमेनंदत्तम् ॥युमेनंदत्तान्त्रितऽएनमायुनगिन्द्रं

ऽण्णम्प्रथुमोऽअद्धचंतिष्ठत् ॥ गन्धुर्व्वोऽअंस्यरशुनामंगृभ्णात्सूरादं
श्श्वंद्वसवोनिरंतष्ट ॥ १३ ॥ असिंघुमꣳ ॥ असियुमोऽअस्यांदित्त्यो
ऽअर्व्वन्नसिंत्रितोगुह्यैनव्रतेनं ॥ असिसोमैनसुमयाद्विपृक्तऽआहुस्त्ते
त्रीणिंदिविबन्धंनानि ॥ १४ ॥ त्रीणिंते ॥ त्रीणितऽआहुर्द्दिविबन्धंना
नित्रीण्युप्प्सुत्रीण्युन्तꣳसंमुद्रे ॥ उतेवंमेव्वरुणश्छन्त्स्यर्व्वन्यत्रांतऽआ
हुꣳपरमञ्जनित्रंम् ॥ १५ ॥ इमातैं ॥ द्वाजिन्नवुमार्ज्जनानीमाशुफानां
ꣳसनितुर्न्निधानां ॥ अत्रांतेभुद्वारंशुनाऽअंपश्यमृतस्युथाऽअंभिरक्षं
न्तिगोपाꣳ ॥ १६ ॥ आत्त्कमानंन्ते ॥ आत्त्कमानंन्तेमनंसारादंजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामुवोदिवापुतयंन्तम्पतुङ्गम् ॥ शिरोऽअपश्यम्पृथिभिः सुगेभिररे
णुभिर्जेहमानम्पतुत्रि ॥ १७ ॥ अन्नांते ॥ रूपमुत्तममंपश्युञ्जिगीं
षमाणमिषऽआपुदेगोः ॥ घृदातेमत्तोंऽअनुभोगमानुडादिद्वसिष्ठऽओ
षंधीरजीगः ॥ १८ ॥ अनुत्त्वा ॥ अनुत्त्वारथोऽअनुमर्य्योऽअर्व्वन्ननु
गावोनुभगः कुनीनांम् ॥ अनुव्रातासुस्तवंसुक्रव्यमीयुरनुदेवामांमि
रेव्वीर्य्यन्ते ॥ १९ ॥ हिरंण्यशृङ्गोयं ॥ हिरंण्यशृङ्गोयोऽअस्युपां
दामनोजवाुअवंरुऽइन्द्रंआसीत् ॥ देवाऽइदंस्यहविरद्यंमायुन्योऽअ
र्व्वन्तम्प्रथुमोऽअुद्धचतिष्ठत् ॥ २० ॥ ईम्मान्तासुःसिलिकमद्धचमासुःसर्ः शूरंणासोदिव्यासोऽ

मासः ॥ ईम्मान्तासुःसिलिकमद्धचमासुःसर्ः शूरंणासोदिव्यासोऽ
अत्त्याः ॥ हृदिसाऽईवश्श्रेणिशोर्यतन्तेयदाक्षिषुर्द्विव्यमज्म्मुमश्वाः ॥
॥ २१ ॥ तवुशरीरम्॥ तवुशरीरम्पतयिष्णव्वर्व्वन्तवंचित्तंव्वातंऽइवुद्ध
जींमान् ॥ तवुशृङ्गांणिव्विष्ठिंतापुरुत्रारंण्येषुजभ्भुंराणाचरन्ति॥ २२॥
उपुप्प्र ॥ उपुप्प्रागुच्छसंनंव्वाज्ज्यवींदेवुद्रीचुमनसादीद्धचांनः ॥ अु
जःपुरोनींयतेनाभिरुस्यानुपुश्चात्कुवयोंयन्तिरेभाः ॥ २३ ॥ उपुप्प्र॥
उपुप्प्रागांत्परमंञ्यत्तसुधस्थुमर्व्वाः ॥ ऽअच्छांपितरंम्मातरंञ्च ॥
अुद्यादेवाञ्जुष्टतमोहिगुम्म्याऽअथाशांस्तेदाशुषेव्वार्य्याणि ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[१३] समिद्धोऽअग्न॥ मनुषोदुरोणेदेवोदेवान्यंजसिजातवेदः ॥ आचुव्वहंमित्रमहश्चिकित्वान्त्वन्दूतःकुविरंसिप्रचेताः ॥ २५॥ शतम् ॥ १६०० ॥ तनूनपात्त्पथः ॥ तनूनपात्त्पथऽऋतस्ययानान्मद्धा समञ्जन्त्स्वदयासुजिह्व॥ मन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचंकृणुह्यध्वरन्नः÷ ॥ २६ ॥ नराशꣳसंस्यमहिमानम् ॥ नराशꣳसंस्यमहिमानमेषामुपंस्तोषामयजुतस्यंयज्ञैः ॥ येसुक्रतवुःशुचंयोधियुन्धाः स्वदंन्तिदेवाऽउभयांनिहुव्या ॥२७॥ आजुह्वानुऽईड्यं÷॥आजुह्वानुऽईड्योन्नन्द्युश्चायांह्यग्नेवसुभिःसजोषाः ॥ त्वन्देवानांमसियह्वहो

तासऽएंनान्यक्षीषितोयजींयान् ॥ २८॥ प्राचीनम्बर्हिः ॥ प्प्रदिशा पृथिव्याव्वस्तोरुस्यावृंज्ज्यतेअग्नेऽअन्हांम् ॥ द्व्युंप्प्रथतेव्वितुरंव्वरींयो देवेभ्योऽअदितयेस्योनम् ॥ २९ ॥ द्व्यचंस्वतीरुर्व्विया ॥ व्विश्श्रंयन्ताम्पतिंभ्योनजनंयुꣳशुम्भमानाः ॥ देवीर्द्वारोबृहतीर्व्विश्व्वमिन्वादेवेभ्योंभवतसुप्प्रायुणाः ॥ ३० ॥ आसुष्ष्वयंन्ती ॥ यजुतेऽउपांकेऽउषासानक्तांसदतान्नियोनौ ॥ दिव्येयोषंणेबृहतीसुरुक्मेऽअधिश्श्रयंदꣳशुक्रपिशुन्दधाने ॥ ३१ ॥ दैव्याहोतारा ॥ प्प्रथमासुवाचामिमांनायुज्ञम्मनुषोयजद्धचै ॥ प्रचोदयंन्ताव्विदथेषुकारूप्प्राचीनꣳयोतिः÷

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्प्रदिशादिशन्ता ॥ ३२ ॥ आनः÷ ॥ आनौयुज्ञम्भारतीतूर्यमेत्त्वि
डांमनुष्ष्वद्दिहचेतयन्ती ॥ तिस्रोदेवीर्ब्बर्हिरेदꣳस्योनꣳसरस्वतीस्व
पंसꣳसदन्तु ॥ ३३ ॥ यऽइमे ॥ द्यावापृथिवीजनित्रीरूपैरपिꣳशद्भुव
नानिविश्वा ॥ तमुद्यहौतरिषितोयजीयान्देवन्त्वष्टारमिहयक्षिविद्वा
न् ॥ ३४ ॥ उपावसृजुत्त्मन्या ॥ समुञ्जन्देवानाम्पाथऽऋतुथाहवी
ꣳषि ॥ वनुस्पतिः÷शमितादेवोऽअग्निꣳस्वदन्तुहव्यम्मधुनाघृतेन ॥
॥ ३५ ॥ सुद्योजातः॥ सुद्योजातोद्यमिमीतयज्ञमुग्निर्द्देवानामभवत्पु
रोगाः॥ अस्यहोतु÷प्प्रदिशृतस्यवाचिस्वाहाकृतꣳहविरदन्तुदेवाः॥

॥ ३६ ॥ [१२] केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेश
सें ॥ समुषद्भिरजायथाः ॥ ३७॥ जीमूतस्येवभवति॥ जीमूतस्येव
भवतिप्प्रतीकंयद्यद्वम्मीयातिसुमदामुपस्त्थें॥ अनाविद्धयातुन्वाजयु
त्त्वꣳसत्त्वाव्वम्मँणोमहिमापिपर्त्तु ॥ ३८॥ धन्वंनागाः॥ धन्वंनागाध
न्वंनाजिञ्जयेमुधन्वंनातीव्राःसुमदोजयेम ॥ धनुःशत्रोरपकाममृक्ष्णो
तिधन्वंनासर्व्वा÷प्प्रदिशोजयेम॥३९॥व्वक्ष्यन्तीवेत्॥ व्वक्ष्यन्तीवेदा
गंनीगन्तिकर्ण्णम्प्रियꣳसखायम्परिषस्वजाना ॥ योषेवशिङ्कृण्व्वितना
धिधन्वज्याऽइयꣳसमंनेपारयन्ती४०॥ तेऽआचरन्ती॥तेऽआचरन्ती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समंनेवृयोषांमातेवंपुत्रम्बिभृतामुपस्त्थें ॥ अपशत्रून्निवद्धचताꣳसं
विदानेऽआत्क्रौंऽइमेविष्फुरन्तीऽअमित्रान् ॥ ४१ ॥ बह्वीनाम्पिता॥
बहुरस्यपुत्रश्चिश्च्याकृणोतिसमंनावुगत्यं ॥ इषुधिꣳशङ्कुꣳपृतंनाश्च
सर्व्वाँ÷पृष्ठेनिनद्धोजयतिप्रसूतꣳ ॥ ४२ ॥ रथेतिष्ठन् ॥ रथेतिष्ठन्नयति
ब्राजिनं÷पुरोयत्रंयत्रकामयतेसुषारथिꣳ ॥ अभीशूनाम्महिमानंम्पना
यतुमनं÷पुश्चादनुयच्छन्तिरश्मयं÷ ॥ ४३ ॥ तीव्रान्घोषान् ॥ तीव्रान्घोषान्कृण्वतेवृषपाणयोश्वारथेभिꣳ सहव्राजयन्तꣳ ॥ अवक्रामन्तꣳप्रपदैरमित्रान्क्षिणन्तिशत्रूँ॥ रनपव्ययन्तꣳ ॥ ४४ ॥ रथवाहं

णꣳहविꣳ ॥ रथवाहंणꣳहविरंस्यनामयत्रायुधन्निहितमस्यवर्म्मं ॥ त
त्रारथमुपशुग्मꣳसंदेमवित्र्वाहांवयꣳसुमनस्यमानाꣳ ॥ ४५ ॥ स्वा
दुषꣳसदं÷पितरं÷ ॥ स्वादुषꣳसदं÷पितरोवयोधाकृच्छ्रेश्रितꣳशक्ती
वन्तोगभीराꣳ ॥ चित्रसेनाऽइषुबलाऽअमृध्राꣳसुतोवीराऽउरवोव्रातसा
हाꣳ ॥ ४६ ॥ ब्राह्मंणासुःपितरꣳ ॥ ब्राह्मंणासुःपितरꣳसोम्यासꣳ
शिवेनोद्यावांपृथिवीऽअनेहसां ॥ पूषानं÷पातुदुरितादृतावृधोरक्षामा
किन्नोऽअघशꣳसऽईशत ॥ ४७ ॥ सुपर्णवस्ते ॥ मृगोऽअस्यादन्तोगो
भिꣳसन्नद्धापततिप्रसूता ॥ यत्रानरꣳसश्चवित्रुद्रवन्तितत्रास्म्मब्भ्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिषंवः शर्म्मँयच्छ्सन् ॥ ४८ ॥ ऋर्जीतेपरिं ॥ वृङ्ङ्धिनोऽम्मांभवतुन
स्तनूः ॥ सोमोऽअधिब्रवीतुनोदितिः शर्म्मँयच्छतु ॥ ४९ ॥ आजङ्घ
न्ति ॥ आजङ्घन्तिसान्वेषाऽघनाः ॥ ऽउपजिग्घ्रते ॥ अश्वांजानि
प्रचेतुसोश्वान्त्सुमत्त्सुंचोदय ॥ ५० ॥ अहिंरिवभोगैः पर्य्येतिबाहु
ञ्याया हेतिम्पंरिबाधंमानः ॥ हस्तघ्नोविश्वांवयुनानिविद्वान्पुमान्पु
मांसंसुम्परिंपातुविश्वतः ॥ ५१ ॥ वनंस्पतेवीड्वङ्गः ॥ वनंस्पतेवीड्व
ङ्गोहिभूयाऽअस्म्मत्त्संखाप्प्रतरंणः सुवीरः ॥ गोभिः सन्नद्धोऽआसिवी
डयंस्वास्त्थातातेंजयतुजेत्वांनि ॥ ५२ ॥ दिवः पृथिव्याः ॥ दिवः

पृथिव्याःपर्य्योजऽउद्भृंतुंवनस्पतिभ्यः पर्य्याभृंतुर्हविषा सहः ॥ अपामो
ज्म्मानम्परिगोभिरावृंतुमिन्द्रंस्यवज्ज्रंर्हविषारथंर्य्यजं ॥ ५३ ॥ इ
न्द्रंस्यवज्ज्रः ॥ इन्द्रंस्यवज्ज्रौमरुतामनीकंमित्रस्यगर्भोवरुणस्यु
नाभिः ॥ सेमान्नोहव्यदातिअषाणोदेवरथुप्प्रतिहव्यागृंभाय ॥५४ ॥
उपश्श्वासय ॥ पृथिवीमुतद्याम्पुरुत्रातैमनुतांविष्टिंतुअगंत् ॥ सदुं
न्दुभेसुजूरिन्द्रेणदेवैर्दूराद्दवींयोऽअपसेधशत्रून् ॥ ५५ ॥ आक्रंन्दय ॥
आक्रंन्दयबलमोजोनऽआधांनिष्टंनिहिदुरिताबाधंमानः ॥ अपंप्प्रोथ
दुन्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरंसिवीडयंस्व ॥ ५६ ॥ आमूः ॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूरंजप्प्रत्यावर्तयेमाऽकैतुमद्दुन्दुभिर्वावदीति ॥ समश्श्वपर्णाश्चरं
न्तिनोनरोस्म्माकमिन्द्ररथिनोजयन्तु ॥ ५७ ॥ आग्नेयऽकृष्णग्रीं
वꣳ ॥ सारस्वतीमेषिबन्भ्रुऽसौम्म्यऽपौष्णऽश्यामऽशितिपृष्ठोबार्हस्प्पु
त्यऽ शिल्प्पोवैश्श्वदेवऽऐन्द्रोरुणोमारुतऽकुल्म्माषऽऐन्द्राग्नऽसंहि
तोधोरामꣳसावित्रोर्व्वारुणऽकृष्णऽएकशितिपात्त्पेत्त्वः ॥ ५८ ॥ अ
ग्नयेनीकवते ॥ अग्नयेनीकवतेरोहिताञ्जिरनुष्ट्वानुधोरामौसावित्रौ
पौष्णौरजुतनाभीर्व्वैश्श्वदेवौपिशङ्गौतूपरौमारुतऽकुल्म्माषऽआग्ने
यऽकृष्णोजऽसारस्वतीमेषीर्व्वारुणऽपेत्त्वः ॥ ५९ ॥ अग्नयेगायत्रा

यं॥ त्रिवृतेरार्थन्तरायाष्टाकपालऽइन्द्रायत्रैष्टुभायपञ्चदशायबार्हतायै
कादशकपालोर्व्विश्श्वेभ्योदेवेभ्योजागतेभ्यऽसप्तदशेभ्योर्व्वैरूपे
भ्योद्वादशकपालोमित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां
वैराजाभ्यांपयस्यायाबृहस्प्पतयेपाङ्क्तायत्रिणवायशा क्व रायंचरुऽसावित्र
ऽऔष्णिहायत्रयस्त्रिꣳशायरैवतायद्वादशकपालऽप्प्राजापत्त्यश्चरुर
दित्त्यैविष्णुपत्त्कन्यैचरुरग्नयेर्व्वैश्श्वानरायद्वादशकपालोनुमत्त्याऽ
अष्टाकपालꣳ ॥ ६० ॥ [२४]॥४॥ इति श्रीशुक्लयजुःसंहितापाठे एकोन
त्रिंशोऽध्यायः ॥ २९ ॥ देवसवितःषट्तपसेकौलालꣳषोडशद्वौद्धाविꣳ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शतिः ॥ देवंसवितः ॥ देवंसवितुःप्रसुंवयुज्ञम्प्रसुंवयुज्ञपंतिम्भगायं ॥
दिव्योगन्धुर्व्वःकेतुपूःकेतन्नःपुनातुव्वाचस्प्पतिर्व्वाचंन्नःस्वदतु ॥ १ ॥ त
त्त्संवितुः ॥ तत्त्संवितुर्व्वरेण्युम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्र
चोदयात् ॥ २ ॥ विश्वांनिदेव ॥ सवितर्दुरितानिपरासुव ॥ यद्भद्रन्त
न्नऽआसुंव ॥ ३ ॥ विभुक्षारंꣳहवामहे ॥ विभुक्षारंꣳहवामहेव्वसोश्चित्र
स्युराधंसः ॥ सुवितारंन्नचक्षसम् ॥ ४ ॥ ब्रह्मंणेब्राह्मणम् ॥ ब्र
ह्मंणेब्राह्मणक्षत्त्रायंराजन्यम्मरुद्भ्योव्वैश्युन्तपंसेशूद्रन्तमंसेतस्कं
रन्नारकायंव्वीरहणम्पाप्मनेक्लीबमांक्रयायाऽअयोगङ्कामायपूंश्चलूम

तिंक्रुष्टायमागुधम् ॥ ५ ॥ नृत्तायंसूतम् ॥ नृत्तायंसूतङ्गीतायंशैलू
षन्धम्मांयसभाचुरन्नरिष्ट्यैभीमुलन्नम्मायंरेभꣳहसायुकारिंमानु
न्दायंस्त्रीषुखम्प्रमदैकुमारीपुत्रम्मेधायैरथकारन्धैष्ठ्यांयुतक्षांणम् ॥
॥ ६ ॥ [६ ॥ तपंसेकौलालम् ॥ तपंसेकौलालम्मायायैकुम्मांरंꣳरू
पायंमणिकारꣳशुभेवुपꣳशरव्यायाऽइषुकारꣳहेत्त्यैधनुष्कारङ्कर्म्मंणे
ज्ज्याकारन्दिष्टायंरज्जुसर्ज्जम्मृत्त्यवैमृगयुमन्तंकायश्वनिनम् ॥ ७ ॥
नदीभ्यंःपौञ्जिष्टम् ॥ नदीभ्यंःपौञ्जिष्टमृक्षीकाभ्योनैषादम्पुरुष
व्यांग्घायंदुर्म्मदङ्गन्धर्व्वाप्सरोभ्योव्रात्यम्प्रयुग्भ्यऽउन्मत्तꣳसर्प्पदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वजुनेब्भ्योप्प्रातिपदुमयैब्भ्यश्कितवमीर्ष्यतायुाऽअकितवम्पिशुाचे
ब्भ्योबिदलकुारीर्ष्यातुधानेब्भ्यश्कण्टकीकुारीम् ॥ ८ ॥ सुन्धयैजुा
रम् ॥ सुन्धयैजुारङ्गेहायोपपुतिमात्यैुपरिवित्तुन्निर्ऋत्यैपरिविविदान
मराद्धचाऽएदिधिषुश्पुतिन्निष्कृत्यैपेशस्कुारीश्सुज्ञानायस्म्मरकुा
रीम्प्रकुामोद्धायोपुसदंव्वर्णायानुरुधुम्बलायोपुदाम् ॥ ९ ॥ उत्सुादे
ब्भ्यः÷कुब्जम् ॥ उत्सुादेब्भ्यः÷कुब्जम्प्रमुदैव्वामुनन्द्धुब्भ्यश्स्त्रामर्द्धस्व
म्प्रायुान्धमधर्म्मायबधिरम्पुवित्रायभिषजम्प्रज्ञानायनक्षत्रदुर्शमांशि
क्षायैप्प्रश्निनंमुपशिक्षायाऽअभिप्प्रश्निनम्मुर्ष्यादायैप्प्रश्नाविवाुक

म् ॥ १० ॥ अम्मैंब्भ्योहस्तिपम् ॥ अम्मैंब्भ्योहस्तिपश्चवायाश्श्वु
पम्पुष्टचैगोपालंव्वीर्य्यायाविपालन्तेजसेजपालमिरायैकीनाशंड्डीला
लायसुराकुारम्भद्रार्यगृहुपश्श्रेयंसेवित्तुधमाद्धचंक्ष्यायानुक्षुत्तारम्
॥ ११ ॥ भायैदार्व्वाहुारम् ॥ भायैदार्व्वाहुारम्प्रभायाऽअग्न्येधम्ब्रुद्ध्
स्यंव्विष्टपायाभिषेक्कारंव्वर्षिष्ठायुनाकायपरिवेष्टारंन्देवलोकायपेशितां
रंम्मनुष्यलोकायंप्प्रकरितारुंसर्व्वेब्भ्योलोकेब्भ्यंऽउपसेक्कारुमवऽ
ऋत्यैव्वुधायोपमन्थितारुम्मेधायव्वासऽपल्प्पूलीम्प्रकुामायंरजयित्री
म् ॥ १२ ॥ ऋुतयैस्तेनहृदयम् ॥ ऋुतयैस्तेनहृदयंव्वैरंहत्यायुपिशुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुंव्विविंक्त्यैक्षुत्तारुमौपद्रष्ट्रचायानुक्षुत्तारुम्बलायानुचुरम्भूम्म्नेपरिष्ष्कु
न्दम्प्रियार्यप्प्रियवादिनुमरिंष्टचाऽअश्श्वसादꣳस्वुग्गार्यलोकार्यभा
गदुघंव्वार्षिंष्टायुनाकांयपरिवेष्टारंम् ॥ १३ ॥ मुन्यवैयस्तापम् ॥ मु
न्यवैयस्तापङ्कोधांयनिसुरँष्योगांययोक्कारुꣳशोकांयाभिसुर्तारुङ्क्षेमां
यव्विमोक्कारंमुत्कूलनिकूलेब्भ्यंस्त्रिष्ठिनुंव्वर्षुंषेमानस्कृतꣳशीलांयाञ्च
नीकुरीन्निँऋत्यैकोशकुरींष्युमायुसूम् ॥ १४ ॥ घुमार्यंघमुसूम् ॥
घुमार्यंघमुसूमर्थर्व्वब्भ्योवंतोकाꣳसंव्वत्सुरार्यपर्ष्यायिणींम्परिवत्सुरा
यांविंजातामिदावत्सुरायातीत्वंरीमिद्वत्सुरायांतिष्कद्वंरींव्वत्सुरायु

व्विजर्ज्जराꣳसँव्वत्सुरायुपलिक्नीमुभुब्भ्योंजिनसुन्धꣳसाद्धचेब्भ्य
श्च्चर्म्मुम्मम् ॥ १५ ॥ सरौब्भ्योधैवुरम् ॥ सरौब्भ्योधैवुरमुपुस्त्था
वंराब्भ्योदार्शंव्वैशुन्ताब्भ्योंबैन्दन्नंडुलाब्भ्युꣳशौष्कलम्पुरार्यमार्ग्गार
मंवुरार्यकेवर्तन्तीर्थेंब्भ्यंऽआन्दंव्विषमेब्भ्योमैनालꣳस्वनेंब्भ्युꣳपर्ण्ण
कुङ्कुहांब्भ्युꣳकिरांतुꣳसानुंब्भ्योजम्भंकुम्पर्व्वतेब्भ्यꣳकिम्पूरुषम् ॥
॥ १६ ॥ बीभुत्सार्यैपौल्कुसम् ॥ बीभुत्सार्यैपौल्कुसंव्वर्ण्णार्यहिरण्य
कारन्तुलार्यैव्वाणिजम्पश्च्चादोषार्यग्गल्गविनुंव्विश्श्वैब्भ्योभूतेब्भ्यः÷
सिध्मुलम्भूत्यैजागरुणमभूत्यैस्वपुनमात्यैजनवादिनुंव्यृद्धचाऽअप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुल्भर्द्सर्द्शुरायंप्प्रुच्छिदंम् ॥ १७ ॥ अक्षुराजायंकितुवम् ॥ अ
क्षुराजायंकितुवङ्कृतायांदिनवदुर्शन्त्रेतायैकुलिप्पनंन्द्वापरायाधिकु
लिप्पनंमास्कुन्दायंसभास्त्थाणुम्मृत्यवेंगोद्युच्छमन्तंकायगोघात
ङ्कुधेयोगांव्विकृन्तन्तुम्भिक्षंमाणऽउपुतिष्ठंतिदुष्कृतायुचरंकाचार्य्य
म्पाप्मनेंसैलुगम् ॥ १८ ॥ प्रुतिश्श्रुत्कांयाऽअर्तनम् ॥ प्रुतिश्श्रु
त्कांयाऽअर्तनङ्घोषांयभुषमन्तांयबहुवादिनंमनुन्तायमूकुर्द्शब्दांया
डम्बराघातम्महंसेव्वीणावादङ्कोशांयतूणवुध्मंमंवरस्प्पुरायंशङ्खुध्मंव्व
नांयव्वनुपमुन्म्यतौरण्यायदावुपम् ॥ १९ ॥ नुम्मायंपुँश्चुलूम् ॥ नुम्मा

यंपुँश्चुलूंश्हसांयुकारिंय्यादंसेशाबल्याङ्गांमुण्युङ्गणंकमभिक्रोशंकु
न्त्तान्महंसेव्वीणावादम्पाणिग्घ्नन्तूंणवुध्मन्तान्नृत्तायांनुन्दायंतलुवम्
॥ २० ॥ अग्न्नयेपीवांनम् ॥ अग्न्नयेपीवांनम्पृथिव्यैपीठसुर्प्पिणंव्वाय
वेंचाण्डालमुन्तरिक्षायव्वर्द्शनुर्तिनंन्दिवेखंलुतिर्द्सूय्यांयहर्य्यृक्षन्नक्षं
त्रेभ्यऽंकिर्म्मिरञ्चन्द्रमंसेकिलासुमन्हेशुक्लम्पिङ्गाक्षर्द्राःयैकृष्ण
म्पिङ्गाक्षम् ॥ २१ ॥ अथैतान् ॥ अथैतान् ॥ अथैतानुष्टौव्विरूपानालंभतेति
दीर्घंश्चातिह्रस्वश्चातिस्त्थूलश्चातिकृशश्चातिशुक्लश्चातिकृष्णुश्चाति
कुल्वश्चातिलोमशश्च ॥ अशूद्राऽअब्राह्मणास्तेप्प्राजापत्त्याः ॥ मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुधꣳपुँश्चुलीकितुवꣳक्लीबोशूद्राऽअब्राह्मणास्तेप्प्राजापत्याः ॥ २२ ॥
[१६] इति श्रीशुक्लयजुस्संहितापाठेत्रिंशत्तमोऽध्यायः ॥ ३० ॥
सहस्रशीर्षापोडशाभ्यःसंभृतःषट्द्वौद्वाविंशतिः ॥ सुहस्रंशीर्षापुरु
षः ॥ सहस्राक्षःसुहस्रंपात् ॥ सभूमिंविसुर्व्वतस्प्पृत्वात्त्यतिष्ठद्दशाङ्गु
लम् ॥ १ ॥ पुरुषऽएव ॥ पुरुषऽएवेदꣳसर्व्वुय्यद्भूतंय्यच्चभाव्यम् ॥ उ
तामृतत्त्वस्येशानोयदन्नेनातिरोहंति ॥ २ ॥ एतावानस्य ॥ महिमा
तोज्ज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंन्दि
वि ॥ ३ ॥ त्रिपादूर्द्धः ॥ त्रिपादूर्द्धऽउदैत्पुरुषꣳपादोस्येहाभवत्पुनः ॥

ततोव्विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोव्विराट् ॥ ततो
व्विराडजायतव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमि
मथोपुरः ॥ ५ ॥ तस्मांद्यज्ञात् ॥ तस्मांद्यज्ञात्त्सर्व्वुहुतꣳसम्भृतम्पृष
दाज्ज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ ६ ॥ त
स्म्मांद्यज्ञात् ॥ तस्म्मांद्यज्ञात्त्सर्व्वुहुतऽऋचꣳसामानिजज्ञिरे ॥ छन्दा
ꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥ तस्म्मादश्वाः ॥
तस्म्मादश्वाऽअजायन्तुयेकेचौभुयादंतः ॥ गावोहजज्ञिरेतस्म्मा
त्तस्म्माज्जाताऽअजावयः ॥ ८ ॥ तंय्यज्ञम् ॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्पुरुषꣳजातमग्र्यतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥
यत्पुरुषम् ॥ यत्त्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखङ्किम
स्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्य ॥ ब्रा
ह्मणोस्स्युमुखंमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यंःपद्भ्या
ꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनंसꣳ ॥ चन्द्रमामनंसोजात
श्चक्षोꣳसूर्य्योऽअजायत ॥ श्श्रोत्राद्वायुश्चंप्प्राणश्चमुखादग्निरंजाय
त ॥ १२ ॥ नाभ्यांऽआसीत् ॥ नाभ्यांऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौः
समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशꣳश्रोत्रात्तथालोकाꣳ ॥ ऽअकल्पयन्

॥ १३ ॥ यत्त्पुरुषेण ॥ हविषादेवायज्ञमतन्वत ॥ वसुन्तोस्स्यासीदा
ज्ज्यंग्रीष्म्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्तास्स्यांसन् ॥ सप्तास्स्यांस
न्परिधयस्त्रिःसप्तसमिधंःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पु
रुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञम् ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माँ
णिप्प्रथुमान्यासन् ॥ तेहनाकंम्महिमानꣳसचन्तयत्रपूर्व्वेसाद्ध्याꣳस
न्तिदेवाः ॥ १६ ॥ [१६] अद्भ्यꣳसम्भृतः ॥ पृथिव्यैरसाच्चविश्वकर्म्म
णꣳसमवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्त्यस्यदेवत्व
माजानमग्रे ॥ १७ ॥ वेदाहम् ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्ण्णुन्तमंसऽपुरस्तात् ॥ तमेवविद्विदित्वातिमृत्युमेतिनान्यः पन्थाविद्यु
तेयंनाय ॥१८॥ प्रजापतिश्चरति ॥ प्रजापतिश्चरतिगर्भेऽअन्तरजा
यमानोबहुधाविजायते ॥ तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्नहं
तस्त्थुर्भुवनानिविश्वा ॥ १९ ॥ योदेवेभ्यः ॥ योदेवेभ्यऽआतपति
योदेवानाम्पुरोहितः ॥ पूर्व्योयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥
॥२०॥रुचम्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्रेतदब्रुवन् ॥य
स्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥२१॥ श्रीश्च ॥ श्रीश्च २१२
तेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥

इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥ २२ ॥ [६] ॥२॥
इति श्रीशुक्लयजुःसंहितायांएकत्रिंशोऽध्यायः ॥ ३१ ॥ तदेवसप्तवेन
स्तन्नवद्यौषोडश ॥ तदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्र
माः ॥ तदेवशुक्रन्तद्ब्रह्मतऽआपुःसप्रजापतिः ॥ १ ॥ सर्व्वेनिमे
षाः ॥ सर्व्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि ॥ नैनंमूर्द्ध्नातिर्य्यञ्चन्नम
द्ध्येपरिजग्रभत् ॥ २ ॥ नतस्यं ॥ प्रतिमाऽअस्तियस्युनानामंमु
हद्यशः ॥ हिरण्यगर्भऽइत्येषमामाहिꣳसीदित्येषायस्म्मान्नजातऽइ
त्येषः ॥ ३ ॥ एषोह ॥ देवःप्रदिशोनुसर्व्वाःपूर्व्योहजातःसऽउगर्भेऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्तꣳ॥सऽएवजातꣳसर्जनिष्ष्यमाणꣳप्रत्यङ्ङास्तिष्ठतिसुव्वर्तोमुखꣳ
॥ ४॥ यस्म्माज्जातम् ॥ यस्म्माज्जातन्नपुराकिञ्चनैवयऽआबभूवुभु
वंनानिव्विश्वा ॥ प्रजापतिꣳप्रजयासꣳरराणस्त्रीणिज्ज्योतींꣳषिसच
तेसषोडशी ॥ ५॥ येनद्यौः ॥ येनद्यौरुग्रापृथिवीचदृढायेनुस्वस्त
भितंय्येनुनाकꣳ॥ योऽअन्तरिक्षेरजसोव्विमानꣳकस्मैदेवायहुविषाव्वि
धेम ॥ ६॥ यङ्क्रन्दसी ॥ यङ्क्रन्दसीऽअवंसातस्त्तभानेऽअभ्यैक्षेतान्म
नंसारेजमाने ॥ यत्राधिसूरऽउदितोव्विभातिकस्म्मैदेवायहुविषाव्विधे
म॥ आपोहुयद्बृहतीर्य्याश्चिदापꣳ॥ ७॥ [७] व्वेनस्तत् ॥ व्वेनस्त

त्पश्यन्निहितङ्गुहासद्यत्रव्विश्वम्भवत्येकनीडम् ॥ तस्म्मान्निदꣳस
श्चव्विचैतिसर्व्वꣳसऽओतुꣳप्रोतश्चव्विभूꣳप्रजासु ॥ ८॥ प्रतत् ॥ प्रतद्वो
चेदमृतन्नुव्विद्वान्गन्धुर्व्वोधामव्विभृतुङ्गुहासत् ॥ त्रीणिपदानिनिहितागु
हास्युयस्तानिव्वेदसपितुꣳपितासत् ॥ ९॥ सनः॥ सनोबन्धुर्ज्जनिता
सव्विधाताधामानिव्वेदभुवनानिव्विश्वा॥ यत्रदेवाऽअमृतमानशानास्तृ
तीयेधामन्नध्यैरयन्त ॥ १०॥ पुरीत्यंभूतानिं ॥ पुरीत्यंलोकान्पुरी
त्युसर्व्वाꣳप्प्रदिशोदिशश्च ॥ उपस्थायंप्प्रथमजामृतस्स्यात्क्मना
त्क्मानंमभिसंव्विवेश ॥ ११॥ परिद्यावांपृथिवी ॥ सद्यऽइत्त्वापरिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकान्परिदिशुꣳपरिस्त्वः ॥ ऋतस्यतन्तुंवितंतंविचृत्युतदंपश्युत्त
दंभवुत्तदासीत् ॥ १२ ॥ सदंसुरुप्पतिंम् ॥ सदंसुरुप्पतिमद्भूतम्प्रिय
मिन्द्रंस्युकाम्म्यंम् ॥ सुनिम्मेधामंयासिषुꣳस्वाहां ॥ १३ ॥ याम्मे
धाम् ॥ याम्मेधान्दैवगुणाꣳपितरंश्चोपासंते ॥ तयामामुद्यमेधयाग्नें
मेधाविंनङ्कुरुस्वाहां ॥ १४ ॥ मेधाम्मैं ॥ मेधाम्मेव्वरुंणोददातुमेधा
मुग्निꣳप्प्रजापंतिꣳ ॥ मेधामिन्द्रंश्चवायुश्चंमेधान्धाताददातुमेस्स्वा
हां ॥ १५ ॥ इदम्मैं ॥ इदम्मेब्रह्मंचक्षुत्रश्चोभेश्श्रियंमश्नुताम् ॥

मयिंदेवादंधतुश्श्रियुमुत्तंमान्तस्स्यैंतेस्वाहां ॥ १६ ॥ [९] ॥ २ ॥
इति श्रीशुक्लयजुःसंहितायांद्वात्रिंशोऽध्यायः ॥ ३२ ॥ अस्याजरा
सःसप्तदशापश्चित्द्वादशविभ्राट्चतुर्दशप्रवावृजएकादशप्रवायुंप्रवीर
यापंचदशकावानस्त्रयोदशसप्तसप्तनवतिः ॥ अस्स्याजरांसꣳ ॥ अ
स्स्याजरांसोदुमामुरित्राऽअर्च्चद्धूमासोऽअग्न्नयंः÷पावुकाꣳ ॥ श्वेतीं
चयंः÷श्वात्रासौभुरण्यवौव्वनुर्षदौव्वायवोनसोमाꣳ ॥ १ ॥ हरंयोधूम
केंतवꣳ ॥ हरंयोधूमकेंतवोव्वातंजूताऽउपुद्यविं ॥ यतंन्तेव्वृथंगुग्न्नयंः÷ ॥
॥ २ ॥ यजांनꣳ ॥ यजांनोमित्रावरुंणायजांदिवाꣳ ॥ ऽऋतम्बृहत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्ग्नेषाक्षिस्स्वन्दंमम् ॥३॥युक्ष्वाहि ॥ देवुहूतमांꣳऽ॥ अश्श्वांꣳ ॥ऽ
अग्ग्नेरथीरिंव ॥ निहोतांपूर्व्यꣳसंदꣳ ॥ ४ ॥ द्वेव्विरूपे ॥ चरतꣳ
स्वर्त्थैंऽअन्याऩ्यांव्वुत्समुपंधापयेते ॥ हरिंरन्यस्युम्भवंतिस्वुधावां
ञ्छुक्रोऽअन्यस्यांन्दद्दृशेसुवर्च्चांꣳ ॥ ५॥ शतम् १७०० ॥ अयमिह ॥
प्प्रथुमोधांयिधात्तभिर्होतायजिंष्ठोऽअर्द्धरेष्ष्वीड्यꣳ ॥ यमप्पन्नंवानोभृ
गंवोव्विरुरुचुर्व्वनेंषुचित्रंव्विभ्वंव्विशेव्विशे ॥ ६ ॥ त्रीणिंशता ॥ त्रीसुह
स्राण्युग्ग्निन्त्रिꣳशच्चंदेवानर्वचासपर्य्यन् ॥ औक्षंन्घृतैरस्तृणन्बर्हिरं २४५
स्म्माऽआदिद्धोतांरन्न्यसादयन्त ॥ ७॥ मूर्द्धानंन्दिवꣳ ॥ मूर्द्धानंन्दि

वोऽअंरतिम्पृथिव्यावैꣳश्वानरमृतऽआजातमुग्ग्निम् ॥ कविꣳसुम्म्रा
जुमतिंथिञ्जनांनामासन्नापात्रंञ्जनयन्तदेवाꣳ ॥ ८ ॥ अग्ग्निर्व्वृत्राणिं ॥
जङ्घ्नद्रविणस्युव्विंपन्न्ययां ॥ समिद्धꣳशुक्रऽआहुतꣳ ॥ ९ ॥ व्विꣳश्वेभिꣳ
सोम्म्यम् ॥ व्विꣳश्वेभिꣳसोम्म्यम्मद्धुग्ऽइन्द्रेणव्वायुनां ॥ पिबांमित्र
स्युधामंभिꣳ ॥ १० ॥ आयत् ॥ आयदिषेनृपतिन्तेजऽआनुद्दशुचिरे
तोनिषिक्तुन्द्यौरभीकें ॥ अग्ग्निꣳशर्द्धंमनवुद्यंय्युवांनꣳस्वाद्धुयजनय
त्त्सूदयंच्च ॥ ११ ॥ अग्ग्नेशर्द्धं ॥ महतेसौभंगायतवंद्युम्म्नान्न्युत्तुमा
निंसन्तु ॥ सञ्जांस्प्पत्त्यꣳसुयमुमाकृंणुष्ष्वशत्रूयतामभितिंष्ठामहां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छंसि ॥ १२ ॥ त्वाछंहि ॥ मुन्द्रतममर्कशोकैर्व्वंवृमहेमहिनुऽश्रोष्ट्यं ग्ने ॥ इन्द्रन्नत्त्वाशवंसादेवतांव्वायुम्पृणन्तिराधंसानृतंमाऽ ॥ १३ ॥ त्त्वेऽअग्ने ॥ स्वाहुताप्प्रियासं÷सन्तुसूरयं÷ ॥ यन्तारोषेमघवांनोज नांनामूर्व्वान्दयंन्तुगोनांम् ॥ १४ ॥ श्रुधिश्श्रुंत्त्कर्ण्णु ॥ श्रुंधिश्श्रुंत्त्क र्ण्णुव्वन्निहभिर्द्दैवैरग्नेसुयावंभिऽ ॥ आसींदन्तुबर्हिषिमित्रोऽअर्य्यमा प्प्रातुर्य्यावांणोअद्धुरम् ॥ १५ ॥ व्विश्श्वेषांमदितिः ॥ व्विश्श्वेषांम दितिर्य्यज्ञियांनाँव्विश्श्वेषांमतिंथिर्म्मानुषाणाम् ॥ अग्निर्द्देवानांमवं ऽआवृणानऽसुमृडीकोभंवतुजातवेदाः ॥ १६ ॥ मुहोऽअग्नेऽ ॥ संमि

धुनस्युशर्म्मण्यनांगामित्रेव्वरुणेस्वस्तयें ॥ श्रेष्ठैस्यामसवितुऽसवींम निुतद्देवानांमवोऽअद्यावृंणीमहे ॥ १७ ॥ [१७] आपंश्चित् ॥ आ पंश्चित्पिप्पुस्तृष्यौंनगावोनक्षंन्नृतञ्जंरितारंस्तऽइन्द्र ॥ याहिव्वायुर्न्न नियुतोंनोऽअच्छात्त्वर्द्धहिधीभिर्द्दयंसेव्विवाजांन् ॥ १८ ॥ गावुऽउपं ॥ गावुऽउपांवतावुतम्मुहीयुज्ञस्यंरुप्प्सुदां ॥ उभाकर्ण्णाँहिरुण्ययां ॥ ॥ १९ ॥ यदुद्य ॥ सूरुऽउदितेनांगामित्रोऽअर्य्यमा ॥ सुवातिंसविता भगं÷ ॥ २० ॥ आसुतेसिंञ्चतुश्श्रियुर्द्रोदंस्योरभिश्श्रियंम् ॥ रसा दंधीतव्वृषभम् ॥ तम्प्रत्त्क्रथायंव्वेनः ॥ २१ ॥ आतिष्ठंन्तुम्परिं ॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिष्ठँन्तुम्परिव्विश्वेऽअभूषुश्छ्रियोव्वसांनश्चरतिस्वरोंचिः ॥ मुहत्त
ष्टृष्णोऽऽअसुरस्युनामाँव्विश्श्वरूपोऽअमृतांनितुस्थौ ॥ २२ ॥ प्र
वेः ॥ प्रवोंमुहेमन्दमानायान्धसोच्चाँव्विश्श्वानरायव्विश्श्वाभुवे ॥ इ
न्द्रस्ययस्यसुमंखुः सहोमहिश्श्रवोनृम्मणश्चरोदंसीसपुर्य्यत ॥२३॥
बृहन्नित् ॥ बृहन्निदिध्मऽएंषाम्भूरिंशुस्तम्पृथुःस्वरुः ॥ येषामि
न्द्रोयुवासखा ॥ २४ ॥ इन्द्रेहि ॥ इन्द्रेहिमत्स्यन्धसोव्विश्श्वे
भिःसोमुपर्व्वभिः ॥ मुहाः ॥ ऽअभिष्टिरोजसा ॥ २५ ॥ इन्द्रोव्वृत्रम् ॥
इन्द्रोव्वृत्रमवृणोच्छर्द्धनीतिःप्रमायिनांममिनाद्वर्प्पणीतिः ॥ अहन्व्यं

ꣳसमुशधुग्ग्वनैष्ष्वाविर्द्धेनाऽअकृणोद्ब्रुम्म्याणाम् ॥ २६ ॥ कुतु
स्त्वम् ॥ कुतुस्त्वमिन्द्रमाहिनुःसन्नेकोंयासिसत्पतेकिन्तऽइत्थास
म्पृच्छसेसमराणःशंभुनैर्व्वोचेस्तन्नोहरिवोयत्तेऽअस्म्मे ॥ मुहाः ॥
ऽइन्द्रोयऽओजसाकुदाचुनस्तुरीरंसिकुदाचुनप्प्रयुच्छसि ॥२७॥ आ
तत्तऽइन्द्रायवःपनन्ताभियऽऊर्ब्बङ्गोमन्तुन्तितृत्सान् ॥ सुकृत्सुंख्ये
पुरुपुत्राम्मुहीꣳसुहस्त्रंधाराम्बृहतीन्दुदुक्षन् ॥ २८ ॥ इमान्ते ॥ इमा
न्तेधियुम्प्रभरेमुहोमुहीमुस्यस्तोत्रेधिषणायत्तऽआनुजे ॥ तमुत्त्सुवे
चंप्प्रसुवेचंसासुहिमिन्द्रंन्देवासुःशवंसामदुन्ननु ॥ २९ ॥ [१२] व्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्भ्राड्बृहत्॥ व्विभ्राड्बृहत्पिबतुसोम्म्यम्मद्धायुर्द्धद्यज्ञपतावविंहुत
म्॥ व्वातंजूतोयोऽअभिरक्षतित्मनांप्प्रजाःपुपोषपुरुधाव्विरांजति ॥
॥ ३० ॥ उदुत्यम् ॥ उदुत्यञ्जातवेदसन्देवंव्वहन्तिकेतवः÷ ॥ दृशोव्वि
श्श्वांयुसूर्य्यम् ॥ ३१ ॥ येनांपावक ॥ येनांपावकचक्षसाभुरण्यन्तु
जनाꣳ॥ अनु ॥ त्वंव्वरुणपश्यसि ॥ ३२ ॥ दैव्यांवद्ध्वर्य्यूऽआगंतुर्द्धरथें
नुसूर्य्यंत्त्वचा॥ मद्धांयुज्ञर्द्धसमंआथे॥ तम्प्रत्नक्थायंव्वेनाश्चित्रन्देवा
नांम्॥ ३३ ॥ आनः÷ ॥ आनुऽइडाभिर्व्विदथेंसुशुस्तिव्विश्श्वानरःसवि
तादेवऽएतु ॥ अपिषथांयुवानोमत्त्संथानोव्विश्श्वञ्जगंदभिपित्वेमनी

षा ॥ ३४॥ यदुद्य ॥ कच्चंवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तादिन्द्रते
व्वशें ॥ ३५॥ तुरणिर्व्विश्श्वदर्शतऽ॥ तुरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदं
सिसूर्य्य॥ व्विश्श्वमाभांसिरोचनम् ॥३६॥ तत्त्सूर्य्यस्य॥ देवत्वन्त
न्मंहित्वम्मुद्धचाकत्तौर्व्वितंतुर्द्धसञ्जभार॥ युदेदयुक्षद्धरितः÷सधस्त्थु
दाद्रात्रीवासंस्तनुतेसिमस्म्मैं ॥ ३७॥ तन्मित्रस्यं॥ तन्मित्रस्युव्वरुण
स्याभिचक्षेसूर्य्योरुपङ्कृणुतेद्यौरुपस्थें ॥ अनुन्तमुन्यद्धुशंदस्युपाजः÷
कृष्णमुन्यद्धरितꣳसम्भंरन्ति ॥३८॥ बण्मुहान्॥ बण्मुहाꣳ॥अंसि
सूर्य्यबडादित्यमुहाꣳ ॥ऽअंसि ॥ मुहस्तेंसुतोमंह्यिमापंनस्यतेद्धादेंव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुहाः ॥ ऽअंसि॥३९॥बट्सूर्य्यश्श्रवसामुहाः ॥ ऽअंसिसुत्रादेवमुहाः॥ ऽअंसि॥मुन्हादेवानांमसूर्य्य÷पुरोहितोव्विभुज्ज्योतिरदाᳬभ्यम् ४०॥ श्रायंन्तऽइवसूर्य्यंम् ॥ श्रायंन्तऽइवसूर्य्यंविश्श्वेदिन्द्रस्यभक्षत ॥ व्वसूं निजातेजनंमानुऽओजंसाप्प्रतिभागन्नदींधिम ॥ ४१ ॥ अुद्यादेवाः॥ अुद्यादेवाऽउदितासूर्य्यंस्यनिरꣳहंसꣳपिपृतानिरंवद्यात् ॥ तन्नोमित्रो व्वरुंणोमामहन्तामदितिꣳसिन्धुं÷पृथिवीऽउतद्यौः ॥ ४२ ॥ आकृ ष्णेनं ॥ आकृष्णेनरजंसाव्व्वर्त्तमानोनिवेशयंन्नमृतुम्मर्त्त्यंञ्च ॥ हिरुण्ययेनसवितारथेनादेवोयातिभुवंनानिपश्यंन् ॥ ४३ ॥ [१४] प्र

वांवृजे ॥ सुप्प्रयाबर्हिरेषामाविश्प्पतींवुवीरिट्ऽइयाते ॥ व्विशामुक्षो रुषसं÷पूर्व्वहूतौव्वायुꣳपूषास्वस्त्तयेंनियुत्त्वान् ॥ ४४ ॥ इन्द्रवायूबृहस्प्पतिम् ॥ इन्द्रवायूबृहस्प्पतिम्मित्राग्निम्पूषणम्भगंम्॥ आदित्त्यान्मारुंतङ्गणम् ॥ ४५ ॥ व्वरुंणꣳप्प्राविता ॥ भुंवन्मित्रोव्विश्श्वाभिरू तिभिः÷॥ करंतान्नꣳसुराधंसꣳ ॥ ४६ ॥ अधिंनः ॥ अधिनऽइन्द्रेषाँव्वि ष्णोंसजात्त्यानाम् ॥ इतामरुंतोऽअश्विना ॥ तम्प्रत्क्थायंव्वेनोये दैवासुऽआनुऽइडाभिर्व्विश्श्वेभिꣳसोम्म्यम्मद्धोमांसश्च्चर्षणीधृतः॥४७ अग्न्नुऽइन्द्र ॥ व्वरुंणुमित्रुदेवाꣳशर्द्धꣳप्प्रयंन्तुमारुंतोतव्विष्णो ॥ उभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नासत्त्यारुद्रोऽअधुग्नाᳬपूषाभगᳬसरस्वतीजुषन्त ॥ ४८ ॥ इन्द्राग्नी मित्रावरुणा ॥ दितिᳬस्त्व÷पृथिवीन्द्याम्मरुतᳬपर्व्वताᳬ ॥ ऽअुपᳬ ॥ हुᳬ वेविष्णुंम्पूषणम्ब्रह्मंणस्प्पतिम्भगन्नुशᳫंसᳫंसवितारंम्मूतयें ॥ ४९ ॥ अस्म्मेरुद्राᳬ ॥ अस्म्मेरुद्रामेहनापर्व्वतासोवृत्रहत्त्येभरंहूतौसुजोषाᳫः ॥ यᳬशᳫंसंतेस्तुवतेधायिंपुऋज्रऽइन्द्रंज्ज्येष्ठाऽअस्म्माᳫं ॥ ऽअंवन्तुदेवाᳬः ॥ ५० ॥ अुर्व्वाश्चौऽअुद्य ॥ अुर्व्वाश्चौऽअुद्याभंवतायजत्राऽआवो हार्द्दिभयंमानोव्ययेयम् ॥ त्राद्धंन्नोदेवानिजुरोवृकंस्युत्राद्धंङ्कुर्तादंवुप दोंयजत्राᳬः ॥ ५१ ॥ विᳬश्वेंऽअुद्य ॥ मरुतोविᳬश्वेंऽऊतीविᳬश्वेंभवन्त्वु ग्न्नयुᳬसमिद्धाᳬः ॥ विᳬश्वेंनोदेवाऽअवुसागंमन्तुविᳬश्वंमस्तुद्रविंणुं वाजोंऽअुस्म्मे ॥ ५२ ॥ विᳬश्वेंदेवाᳬः ॥ शृणुतेमᳫंहवम्मेयेऽअुन्तरिक्षेयऽउपद्यविष्ट ॥ येऽअग्निजिह्वाऽउतवायर्जत्राऽआसाद्युस्मिन्बर्हिषिमादयद्ध्वम् ॥ ५३ ॥ देवेब्भ्योहि ॥ प्रंथुमंश्व्युज्ञियेब्भ्योमृतुत्वᳫंसुवसिंभागमुंत्तुमम् ॥ आदिद्यामानᳫंसवितुर्द्व्यूर्णुषेनूचीनाजींवितामानुंषेब्भ्यᳬः ॥ ५४ ॥ [११] प्रवायुम् ॥ प्रवांयुमच्छांबृहतीमनीषांबृहद्रयिंविᳬश्ववारᳫंरथुप्राम् ॥ द्युतद्यामानियुतᳬपत्त्यंमानᳫंकविᳫंकविमियक्षसिप्रयज्ज्यो ॥ ५५ ॥ इन्द्रंवायूऽइमे ॥ सुताऽउप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयोभिरागंतम् ॥ इन्दवोवामुशन्तिहि ॥ ५६ ॥ मित्रꣳहुवे ॥ पू
तदक्षंवरुणꣳरिशादसम् ॥ धियंघृताचीꣳसाधन्ता ॥ ५७ ॥ दस्रा
युवाकंवꣳसुतानासंत्र्यावृक्तबर्हिषः ॥ आयातꣳरुद्रवर्त्तनी ॥ त
म्प्रत्नक्थायंवेनः ॥ ५८ ॥ विद्यादिं ॥ विद्यादीसुरमांरुगृणमद्रेर्म्म
हिपार्थ÷पूर्व्यꣳसुघ्न्यक्कꣳ ॥ अग्ग्रन्नयत्सुपद्यक्षराणामच्छारवंम्प्रथुमा
जानुतीगात् ॥ ५९ ॥ नुहिस्प्पशम् ॥ नुहिस्प्पशुमविदन्नन्यमुस्म्मा
द्वैश्वानुरात्पुरऽएतारमग्नेः ॥ एमैनमवृधन्नमृताऽअमर्त्त्यंवैश्वानुर
क्षत्रंजित्त्यायदेवाः ॥ ६० ॥ उग्राविंघनिनां ॥ उग्राविंघनिनामृधऽ

इन्द्राग्नीहवामहे ॥ तानोमृडातऽईदृशे ॥ ६१ ॥ उपास्म्मैगायतान
रꣳपवमानायेन्दवे ॥ अभिदेवाः ॥ ऽइर्यक्षते ॥ ६२ ॥ येत्त्वा ॥ हिह
त्त्यैमघवन्नवर्द्धन्न्येशाम्बुरेहरिवोयेगविष्टौ ॥ येत्त्वानूनमनुमदन्तिविं
प्राꣳपिबेन्द्रसोमुꣳसगणोमुरुद्भिः ॥ ६३ ॥ जनिष्ठाऽउग्रः ॥ सहसेतु
रायमुन्द्रऽओजिष्ठोबहुलाभिमानꣳ ॥ अवर्द्धन्निन्द्रम्मरुतश्चिदत्रंमा
तायद्वीरन्दधनुद्धनिष्ठा ॥ ६४ ॥ आतु ॥ आतूनऽइन्द्रवृत्रहन्नस्म्माकं
मुर्द्धमागंहि ॥ महान्महीभिरूतिभिः ॥ ६५ ॥ त्वमिन्द्र ॥ त्वमिन्द्र
प्रतूर्तिष्वभिविश्वाऽअसिस्पृधः ॥ अशुस्तुहाजनितारविश्वतूरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सित्त्वन्तूर्य्यतरुष्प्युतꣳ ॥ ६६ ॥ अनुते ॥ अनुतेशुष्ममंन्तुरयन्तमी
यतुꣳक्षोणीशिशुन्नमातरा ॥ व्विश्वास्तेस्पृधः श्नथयन्तमुन्यवेवृत्रं
ष्यदिन्द्रतूर्व्वसि ॥ ६७ ॥ युज्ञोदेवानाम् ॥ युज्ञोदेवानाम्प्रत्येतिसु
म्नमादित्यासोभवंतामृडुयन्तः ॥ आवोर्व्वाचीसुमतिर्व्ववृत्यादꣳहो
श्चिद्यावरिवोवित्तुरासत् ॥ ६८ ॥ अदंब्धेभिः सवितः ॥ पायुभिष्ट्व
ꣳशिवेभिरद्यपरिपाहिनोगयम् ॥ हिरण्यजिह्वꣳसुवितायनव्यसेरक्षा
माकिन्नोऽअघशꣳसऽईशत ॥ ६९ ॥ [१५] प्रवीरया ॥ शुचयोदद्रिरे
वामध्वर्य्युभिर्म्मधुमन्तꣳसुतासः ॥ व्वहंव्वायोनियुतोयाह्यच्छापिबा

सुतस्यान्धसोमदाय ॥ ७० ॥ गावुऽउपं ॥ गावुऽउपावतावुतम्मुही
युज्ञस्यरुप्प्सुदा ॥ उभाकर्णाहिरुण्ययां ॥ ७१ ॥ काव्ययोराजानेषु ॥
काव्ययोराजानेषुक्रत्वादक्षस्यदुरोणे ॥ रिशादसासुधस्त्थुऽआ ॥
॥ ७२ ॥ दैव्यावध्वर्य्यू ॥ दैव्यावध्वर्य्यूऽआगंतुꣳरथेनसूर्य्यत्वचा ॥ म
ध्वायुज्ञꣳसमंञ्जाथे ॥ तम्प्रत्क्रथायंव्वेनः ॥ ७३ ॥ तिरश्चीनोव्वितं
तः ॥ तिरश्चीनोव्वितंतोरश्मिर्म्मेरेषामुधस्विदासी ३ दुपरिंस्विदासी
३ त् ॥ रेतोधाऽआसन्महिमानंऽआसन्त्स्वधाऽअवस्तात्प्रयंतिꣳप
रस्तात् ॥ ७४ ॥ आरोदसीऽअपृणदास्वंर्म्महज्ज्रातंव्यदैनमुपसोऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधारयन् ॥ सोऽअंह्वुरायुपरिणीयतेकुविरत्त्योनद्वाजंसातयेचनोंहि
तꣳ ॥ ७५ ॥ उक्थेभिर्व्वृत्रहन्तंमा ॥ उक्थेभिर्व्वृत्रहन्तंमुग्रामंन्दानाचि
दागिरा ॥ आङ्गूषैरुविवासतꣳ ॥ ७६ ॥ उपनꣳ ॥ सूनवोगिरꣳशृण्व
न्त्वमृतंस्यये ॥ सुमृडीकाभंवन्तुनꣳ ॥ ७७ ॥ ब्रह्मांणिमे ॥ मुतयꣳ
शꣳसुतासुꣳशुष्म्मंऽइयर्त्तिप्रभृंतोमेऽअद्रिꣳ ॥ आशांसतेप्प्रतिहर्य्य
न्त्युक्थेमाहरोंद्वहतुस्तानोऽअच्छं ॥ ७८ ॥ अनुंत्तुमातें ॥ मघवन्न
किर्न्नुनत्वावांꣳ ॥ ऽअस्तिदेवत्रांद्विदांनꣳ ॥ नजायमानोनशतेनजातो
यानिकरिष्याकृंणुहिप्प्रवृद्ध ॥ ७९ ॥ तदित् ॥ तदिदांसुभुवंनेषुज्ज्ये

उ.अ. ३३

२५३

ष्ठꣳयतोंयुज्ञऽउग्रस्त्त्वेषनृंम्मणꣳ ॥ सुद्योजज्ञानोनिरिंणातिशत्रूननुयं
द्विश्श्वेमदन्त्यूमाꣳ ॥ ८० ॥ इमाऽउंत्त्वा ॥ पुरूवसोगिरोंद्वर्द्धन्तुया
मम ॥ पावकवंर्णाꣳशुचयोद्विपुश्चितोभिस्तोमैरनूषत ॥ ८१ ॥ यस्या
यम् ॥ यस्यायंद्विश्श्वऽआर्य्योयासꣳशेवधिपाऽअरिꣳ ॥ तिरश्चिद
र्य्येरुशमेपवीरवितुर्ब्भ्येत्त्सोऽअंज्ज्यतेरुषिꣳ ॥ ८२ ॥ अयर्ꣳसुहस्त्र
म् ॥ अयर्ꣳसुहस्त्रमृषिंभिꣳसहंस्कृतꣳसमुद्रऽइंवपप्प्रथे ॥ सुत्त्यꣳसोऽ
अंस्यमहिमागृंणेशवोंयुज्ञेषुंद्विप्प्रराज्ज्यें ॥ ८३ ॥ अदंब्धेभिꣳसवि
तꣳ ॥ पायुभिर्ष्ठर्ꣳशिवेभिरद्यपरिंपाहिनोगयंम् ॥ हिरंण्यजिह्वꣳसुवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तायुनद्ध्यसेरक्षुमाकैन्नोऽअघशꣳसऽईशत ॥ ८४ ॥ [१५] आनः÷ ॥ आनोयुज्ञन्दिविस्पृशंव्वायोयाहिसुमन्मांभिः ॥ अन्तःपवित्रंऽउपरिं श्श्रीणानोयꣳशुक्रोऽअंयामिते ॥ ८५ ॥ इन्द्रवायूसुंसुन्दृशा ॥ सुह वेहहंवामहे ॥ यथानुꣳसर्व्वऽइज्जनोनमीवःसुङ्गमैसुमनाऽअसंत् ॥ ८६ ॥ ऋधंगित्था ॥ समर्त्यः÷शशुमेदेवतांतये ॥ योनूनम्मित्रावरुणावुभि ष्टयऽआचुक्रेहुव्यदांतये ॥ ८७ ॥ आयांतम् ॥ आयांतुमुपंभूषतुम्म द्धं÷पिबतमश्विना ॥ दुग्धम्पयोंव्वृषणाजेन्यावसूमानोमार्द्धिष्टमागं तम् ॥ ८८ ॥ प्रैतु ॥ प्रैतुब्रह्मंणस्पतिःप्रदेव्येतुसूनृता ॥ अच्छांव्वी

उ.अ. ३३

२५१

रन्नऽर्यंम्पुङ्क्तिरांधसन्देवायुज्ञन्नंयन्तुनः ॥ ८९ ॥ चुन्द्रमांऽअप्सु ॥ चुन्द्रमांऽअप्स्वुन्तरासुंपुण्णोंधांवतोदिवि ॥ रुयिम्पुशङ्गंम्बहुलम्पुरु स्पृहुद्धिरिंरेतिकनिंक्रदत् ॥ ९० ॥ देवन्दैवंव्वोः ॥ देवन्दैवंव्वोवंसेदेव न्दैवमुभिष्टंये ॥ देवन्दैवद्धुवेमुव्वाजंसातयेगृणन्तोंदेव्याधिया ॥ ९१ ॥ दिविपृष्टः ॥ दिविपृष्टोऽअंरोचताग्निर्व्वैश्श्वानरोबृहन् ॥ क्षमयांव्वृ धानऽओजंसाचनोंहितोज्ज्योतिषाबाधतेतमः÷ ॥ ९२ ॥ इन्द्राग्नीऽ अपात् ॥ इन्द्राग्नीऽअपादियम्पूर्व्वागांत्पुद्धतीभ्यः ॥ हित्वीशिरोंजि ह्वयाव्वावदच्चरंत्रिद्धिशत्पदान्यक्रमीत् ॥ ९३ ॥ देवासोंहिष्म्मा ॥ मनंवेस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंन्नयद्योविश्वैसाकꣳसरांतयꣳ॥तेनोऽअद्यतेऽअंपुरन्तुचेतुनोभवन्तुव्व
रिवोविदꣳ॥ ९४ ॥ अपांधमत् ॥ अपांधमदभिशस्तीरशास्तिहाथे
न्द्रोद्युम्म्न्याभंवत् ॥ देवास्त्तंऽइन्द्रसुक्रय्यायंयेमिरेबृहद्भानोमरुद्गण
॥ ९५॥ प्रवꣳ॥ प्रवुऽइन्द्रांयबृहतेमरुतोब्रह्मार्च्चत ॥ वृत्रꣳहंनातिव्र
ह्मशुतक्रतुर्व्वज्र्ज्रेणशुतपर्व्वणा ॥ ९६ ॥ अस्येदिन्द्रोव्वावृधेव्वृष्ण्युꣳ
शवोमदेसुतस्युव्विष्ण्णंवि॥ अद्धातमंस्यमह्विमानंमायवोनुष्टुवन्तिपू
र्व्वथा॥ इमाऽउत्त्वायस्यायमुयꣳसुहस्त्रंमूर्द्धऽऊषुणꣳ॥ ९७ ॥ [१३]
इति श्रीशुक्लयजुःसंहितापाठेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ यज्जाग्रतःप

श्चनद्यःसोमोधेनुमाकृष्ण्णेनपूषंतवदशकानतदष्टौषडष्टापश्चाशत् ॥
यज्जाग्र्यंतꣳ॥ यज्जाग्र्यंतोदूरमूदैतिदैवुन्तदुसुप्तस्युतथैवैतिं॥ दूरङ्गम
ञ्योतिषाञ्योतिरेकुन्तन्मेमनंःशिवसंङ्कल्प्पमस्त्तु॥ १॥ येनुकम्माँ
णि ॥ येनुकम्माँण्युपसोमनीषिणोयुज्ञेकृण्वन्तिव्विदथेषुधीराꣳ ॥ य
दंपूर्व्वंय्युक्षमुन्तꣳप्प्रजानुन्तन्मेमनंःशिवसंङ्कल्प्पमस्त्तु ॥ २॥ यत्प्र
ज्ञानंम्॥ यत्प्रज्ञानंमुतचेतोधृतिश्चयज्ज्योतिरुन्तरमृतंम्प्रजासुं ॥
यस्म्मान्नऽऋतेकिञ्चुनकर्म्माँक्रियतेतन्मेमनंःशिवसंङ्कल्प्पमस्त्तु ॥३
येनेदम्॥ येनेदम्भूतम्भुवंनम्भविष्यत्परिंगृहीतमुमृतेंनुसर्व्वम्॥ ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंयुज्ञस्त्तायतैंसुप्तहोतातन्नमेमनं÷शिवसंङ्कल्प्पमस्त्तु ॥ ४ ॥ यस्मिम्रु
न्नृचं÷॥यस्मिन्नृचः सामुयजूंऽषियस्मिन्नप्रतिंष्ठितारथनाभाविवाराः
यस्मिँश्चित्तꣳसर्व्वमोतंम्प्रजानान्तन्नमेमनं÷शिवसंङ्कल्प्पमस्त्तु ॥ ५॥
सुषारथिरश्वांनिव ॥ सुषारथिरश्वांनिवुयन्नमनुष्ष्यान्नेनीयतेभीशु
